# Matangi Stuti

# માતઙ્ગીસ્તુતિઃ

## Document Information

Text title : Matangi Stuti 2

File name : mAtangIstutiH.itx

Category : devii, stuti, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 23, 2023

*sanskritdocuments.org*

# માતઙ્ગીસ્તુતિઃ

માતઙ્ગિ માતરીશે મધુમદમથનારાધિતે મહામાયે ।
મોહિનિ મોહપ્રમથિનિ મન્મથમથનપ્રિયે નમસ્તેઽસ્તુ ॥ ૧॥

સ્તુતિષુ તવ દેવિ વિધિરપિ પિહિતમતિર્ભવતિ વિહિતમતિઃ ।
તદપિ તુ ભક્તિર્મામપિ ભવતીં સ્તોતું વિલોભયતિ ॥ ૨॥

યતિજનહૃદયનિવાસે વાસવવરદે વરાઙ્ગિ માતઙ્ગિ ।
વીણાવાદવિનોદિનિ નારદગીતે નમો દેવિ ॥ ૩॥

દેવિ પ્રસીદ સુન્દરિ પીનસ્તનિ કમ્બુકણ્ઠિ ઘનકેશિ ।
માતઙ્ગિ વિદ્રુમૌષ્ઠિ સ્મિતમુગ્ધાક્ષ્યમ્બ મૌક્તિકાભરણે ॥ ૪॥

ભરણે ત્રિવિષ્ટપસ્ય પ્રભવસિ તત એવ ભૈરવી ત્વમસિ ।
ત્વદ્ભક્તિલબ્ધવિભવો ભવતિ ક્ષુદ્રોઽપિ ભુવનપતિઃ ॥ ૫॥

પતિતઃ કૃપણો મૂકોઽપ્યમ્બ ભવત્યાઃ પ્રસાદલેશેન ।
પૂજ્યઃ સુભગો વાગ્મી ભવતિ જડશ્ચાપિ સર્વજ્ઞઃ ॥ ૬॥

જ્ઞાનાત્મિકે જગન્મયિ નિરઞ્જને નિત્યશુદ્ધપદે ।
નિર્વાણરૂપિણિ શિવે ત્રિપુરે શરણં પ્રપન્નસ્ત્વામ્ ॥ ૭॥

ત્વાં મનસિ ક્ષણમપિ યો ધ્યાયતિ મુક્તામણીવૃતાં શ્યામામ્ ।
તસ્ય જગત્ત્રિતયેઽસ્મિન્ કાસ્તાઃ નનુ યાઃ સ્ત્રિયોઽસાધ્યાઃ ॥ ૮॥

સાધ્યાક્ષરેણ ગર્ભિતપઞ્ચનવત્યક્ષરાઞ્ચિતે માતઃ ।
ભગવતિ માતઙ્ગીશ્વરિ નમોઽસ્તુ તુભ્યં મહાદેવિ ॥ ૯॥

વિદ્યાધરસુરકિન્નરગુહ્યકગન્ધર્વયક્ષસિદ્ધવરૈઃ ।
આરાધિતે નમસ્તે પ્રસીદ કૃપયૈવ માતઙ્ગિ ॥ ૧૦॥

વીણાવાદનવેલાનર્તદલાબુસ્થગિત વામકુચામ્ ।
શ્યામલકોમલગાત્રીં પાટલનયનાં સ્મરામિ ત્વામ્ ॥ ૧૧॥

અવટુતટઘટિતચૂલીતાડિતતાલીપલાશતાટઙ્કાં
વીણાવાદનવેલાકમ્પિતશિરસં નમામિ માતઙ્ગીમ્ ॥ ૧૨॥

માતા મરકતશ્યામા માતઙ્ગી મદશાલિની ।
કટાક્ષયતુ કલ્યાણી કદમ્બવનવાસિની ॥ ૧૩॥

વામે વિસ્તૃતિશાલિનિ સ્તનતટે વિન્યસ્તવીણામુખં
    તન્ત્રીં તારવિરાવિણીમસકલૈરાસ્ફાલયન્તી નખૈઃ ।
અર્ધોન્મીલદપાઙ્ગમંસવલિતગ્રીવં મુખં બિભ્રતી
    માયા કાચન મોહિની વિજયતે માતઙ્ગકન્યામયી ॥ ૧૪॥

વીણાવાદ્યવિનોદગીત(નૈક) નિરતાં લીલાશુકોલ્લાસિનીં
    વિમ્બોષ્ઠીં નવયાવકાર્દ્રચરણામાકીર્ણકેશાલિકાં (વલિમ્) ।
હૃદ્યાઙ્ગીં સિતશઙ્ખકુણ્ડલધરાં શ◌ૃઙ્ગારવેષોજ્જ્વલાં
    માતઙ્ગીં પ્રણતોઽસ્મિ સુસ્મિતમુખીં દેવીં શુકશ્યામલામ્ ॥ ૧૫॥

સ્રસ્તં કેસરદામભિઃ વલયિતં ધમ્મિલ્લમાબિભ્રતી
    તાલીપત્રપુટાન્તરેષુ ઘટિતૈસ્તાટઙ્કિની મૌક્તિકૈઃ ।
મૂલે કલ્પતરોર્મહામણિમયે સિંહાસને મોહિની
    કાચિદ્ગાયનદેવતા વિજયતે વીણાવતી વાસના ॥ ૧૬॥

વેણીમૂલવિરાજિતેન્દુશકલાં વીણાનિનાદપ્રિયાં
    ક્ષોણીપાલસુરેન્દ્રપન્નગવરૈરારાધિતાઙ્ઘ્રિદ્વયામ્ ।
એણીચઞ્ચલલોચનાં સુવસનાં વર્ણીં પુરાણોજ્જ્વલાં
    શ્રોણીભારભરાલસામનિમિષઃ પશ્યામિ વિશ્વેશ્વરીમ્ ॥ ૧૭॥

માતઙ્ગીસ્તુતિરિયમન્વહં પ્રજપ્તા
    જન્તૂનાં વિતરતિ કૌશલં ક્રિયાસુ ।
વાગ્મિત્વં શ્રિયમધિકાઞ્ચ ગાનશક્તિં
    સૌભાગ્યં નૃપતિભિરર્ચનીયતાઞ્ચ ॥ ૧૮॥

(મન્ત્રકોશતઃ)

ઇતિ માતઙ્ગીસ્તુતિઃ સમાપ્તા ।

Proofread by Rajesh Thyagarajan

*Matangi Stuti*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*